**विद्या भवन बालिका विद्यापीठ लखीसराय**

**वर्ग नवम् विषय संस्कृत शिक्षक श्यामउदय सिंह**

**ता:- २०/०७/२०२० (एन.सी.ई. आर. टी. पर आधारित प्रश्न )**

**अधोलिखतश्लोकौ पठित्वा मञ्जूषात: उचितं पदं चित्वा भावार्थं पूरयत-**

**श्लोक: ५.**गुणेष्वेव हि कर्तव्य: प्रयत्न: पुरुषै: सदा ।

गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणै सम:।।

**भावार्थ:-**अस्मिन् संसारे जना: सदैव (i)......................ग्रहणे एव(ii) .....................कुर्यु:। यत: जगति गुणवन्त: (iii) .....................अपि गुणहीनेषु (iv) .......................श्रेष्ठतमा: मन्यन्ते ।अत: संसारे गुणानाम् अतीव महत्त्वम् अस्ति ।

**मञ्जूषा**

[प्रयत्नान , धनवत्सु , दरिद्रा: , गुणानाम् ]

**श्लोक ६.**आरम्भगुर्वी क्षयिणी क्रमेण ,लघ्वी पुरा वृद्धिमती च पश्चात् ।

दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम्।।

**भावार्थ:-** कवि: भर्तृहरि:नीतिशतके कथयति यत् यथा दिनस्य पूर्वार्द्धे प्राणिनाम् छाया (i)......................दीर्घा पश्चात् शनै:शनै:(ii) ........................समायाति तथैव खलानां दुष्टाणां वा मैत्री अपि प्रारम्भे गुर्वी भवति शनै: शनैश्च क्षयिणी भवति ।

एवमेव यथा परार्द्धे समये (iii) ...................छाया पूर्वं लघ्वी भवति पुनश्च शनै:शनै: वृद्धिम् प्राप्नोति तथैव सज्जनानां

(iv) ...................अपि आरम्भे लघ्वी भवति एवं शनै:शनै:वृद्धिमायाति।

**मञ्जूषा**

[प्राणिनाम् ,आरम्भे ,मैत्री ,क्षयम् ]